तदधिकरणेति॥ तदन्विताधिकरणेत्यर्थः॥ यद्यपिसमानमधिकरणंयस्येतिसतथाऽधिकरणतावद्वृत्त्यधिकरणता
निरूपकमितियावत्॥तस्यभावःसामानाधिकरण्यंसाध्यस्यसमानाधिकरण्यंसाध्यसामानाधिकरण्यंयस्येतिसाध्यसा
मानाधिकरण्यस्यभावःसाध्यासामानाधिकरण्यंइत्यव्ययीभावः॥ तथाचसाध्याधिकरणावृत्तित्वलाभः॥ तत्रससंबं
धिकार्थबोधकोत्तरपदघटितसमुदायेनसमंनञ्समासइतितत्रमध्यनिवेशोपपत्तेः॥ ननुनसामानाधिकरण्यसा
मानाधिकरण्यमित्यव्ययीभावोत्तरंसाध्यपदषष्ठीतत्पुरुषोभट्टाचार्यसमंतः॥ येनसमासाप्रविष्टयदार्थान्वयस्याद्यु
त्पन्नतयाऽव्ययीभावेसमासघटकसमानपदार्थाधिकरणेसाध्यपदार्थेनान्वयप्रसंगभयेनसमानपदस्यसाध्या
धिकरणेलक्षणायाःसाध्यपदस्यतत्तात्पर्यग्राहकतायाश्चस्वीकारेणसामानाधिकरण्यज्ञानादेवस्याध्याधिकरणा
वृत्तित्वलाभोभवेत्॥तथाचकथंतदधिकरणावृत्तिस्वरूपासामाधिकरण्यमित्यभिधानमिति॥तथापितदन्विताधि
करणेत्यर्थविवक्षणान्नदोषः॥ स्वरीतौससंबंधिकार्थत्वप्रकाशनायेवतथोक्तमिति बोध्यं॥समानमेवसमानं स्वार्थस्य
नसामानंसाध्यासामानंतदधिकरणंयस्यससाध्यसमानाधिकरणः॥तस्यभावः॥साध्यासामानाधिकरण्यंसाध्यानधि

करणवृत्तित्वमिति यावत् ॥ अस्मिन्पक्षेऽव्ययंसत्वादित्यादावतिव्याप्तिर्विग्रहवाक्येनरूप्यंदर्शयति ॥ तदनधीति ॥ साध्यसमानाधिकरणंयस्येतिविग्रहवाक्यं असमानाधिकरणमित्याकारकबहुव्रीहिरूपोत्तरपदार्थभेदमितिप्रथमतोसमानाधिकरणमितिबहुव्रीहिविग्रहः सदर्थनीयः ॥ सचनसमानमधिकरणंयस्येत्येवंरूपः ॥ तत्रयदिनअर्थभेदेसमानपदार्थस्यशैवाल्यादेरधिकरणादेःप्रतियोगितयान्वयः ॥ तदाह्यधिकरणानिष्ठभेदप्रतियोगिसमानपदार्थीभूतशैवाल्याद्यधिकरणंप्रत्यप्येवंतथासतिसाध्यसमानाधिकरणंयस्येतिद्वितीयबहुव्रीहिविग्रहवाक्यात्पदार्थिकरणावच्छिन्नप्रतियोगिताकभेदानुयोगिकरणकंसाध्यंप्रतीयेतेतिव्याप्तादिग्रस्तमित्याह ॥ असमानाधिकरणंयस्येत्यादिना ॥ एवंचप्रथमबहुव्रीहिविग्रहवाक्येनअर्थभेदेसमानपदार्थस्यप्रतियोगितयान्वयइतिनभ्रमितव्यं ॥ किंत्वनुयोगितयेवेतिद्वितीयबहुव्रीहिविग्रहवाक्यबोधेयादृशार्थकषष्ठ्यंतादृशार्थपरतामाह तदधिकरणा ॥ नाधिकरणपरतयेति ॥ सचार्थः ॥ यदधिकरणानुयोगिकभेदप्रतियोग्यधिकरणकंसाध्यमित्येवंरूपः ॥ यत्तुजगदीशेनसाध्यमसमानाधिकरणंयस्येत्यस्यसाध्यंयदधिकरणावृत्तीत्यर्थः ॥ तत्रानधिकरणत्वंकथं ॥ तत्रचवह्निमान्धूमादित्या

दौवह्निमात्रस्यतत्तद्धूमाधिकरणावृत्तित्वाद्व्याप्तिरितिद्वितीयकल्पोज्जीवितः। तत्रेदमार्यवर्णेतिनकिंबीजं। ननाव
द्रव्यंसत्तादित्यादावव्याप्तिवारणंद्रव्यत्वस्यसत्ताधिकरणवृत्तित्वनातिव्याप्तेः। अवतार्यकल्पेतदुद्धारेपिएतत्कल्पेतदभा
वात्। यदित्तुसाध्यंयदधिकरणसामान्याभिन्नशिवः वृत्तिमितिनार्थः॥ किंतुयदधिकरणयत्कीचिद्व्यक्तिवृत्तिभिन्नमितितद
तदतिव्याप्युद्धारेपितृतीयकल्पाभेदएवेत्यभिप्रेत्यन्यथावतारणंकृतमितिबोध्यं। स्वाधिकरणावधिकरणकसाध्यकत्वा
नधिकरणतोक्तौताह। यत्तेति। अन्यथाव्यभिचारिण्यतिव्याप्तेः। पदार्थमिति। साध्यासामाधिकरण्यशब्देसाध्येसामा
नाधिकरण्यंयस्येतिव्युत्पत्यंतरांगीकारेणभावप्रधाननिर्देशात्साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वलाभः। द्रव्यंस
त्तादित्यादेर्वारणायकिंविदिति। ननुप्रतियोगित्वशब्देनसामानाधिकरण्यनिरूपकत्वग्रहणेतत्रापिवीयत्वबाधः अभावप्र
तियोगित्वस्थसामानाधिकरण्यमात्रनिष्ठतयातिव्याप्तेर्ग्रहीतुमशक्यत्वादतआह। तत्प्रतियोगित्वेति। प्रतियोगिघटकत्व
नाधिकरणोपादानेशिरोवेष्टनेननासास्पर्शोरीतितत्प्रतियोग्याधेयतानिरूपकत्वेनतदुपादेयं। स्वाधिकरणीभूतयत्किंचि
द्व्यक्तिवृत्तित्वरूपाभावविशेषणंहेयं। वैयर्थ्यात्। नन्वेवंसंयुक्तत्वासंयुक्तत्वोभयाभावप्रतियोग्याधेयतानिरूपकतायाः प

र्वतादोसलादव्याप्तिरतोवच्छेदकत्वंविवक्षयति। साध्येतितादृशप्रतियोगितावच्छेदकत्व स्यायोगोलक्षत्तिस्वेपर्याप्तत्वा
त्अतिव्याप्तिर्हेतुतावच्छेदकसंबंधावच्छिन्नतदृतित्वनिवेशेचासंभवस्यतोनिरूपितत्वसंबंधेनेयुक्तं। समावायित्वंसम
वायित्वंसमवायानुयोगित्वंस्वरूपसंबधेनहेतुः। एतद्विवक्षणेपिहेतुतावच्छेदकसंबधेनवृत्त्यप्रसिद्धेः। समवायेनहिसमे
वेतत्वासमवेतत्वोभयाभावोमादायतादृशप्रतियोगितप्रसिद्धरधिकरणाप्रसिद्धानुधावनं। नचसाध्यातावच्छेदकसंबंध
तदितरसंबंधावच्छिन्नाधेयतयोःव्यभिचारनिरूपकाधिकरणवत्त्वसत्वेनसाध्येतदभावोनास्तीत्यतिव्याप्तिवारणायसा
ध्यतावच्छेदकसंबंधावच्छिन्नाधेयतात्वावच्छिन्नत्वंप्रतियोगितायांविवक्षणीयं। स्वस्वरूपान्यसंबधावच्छिन्नहेतुभूति
त्वाभावमादायासंभववारणायस्वस्वरूपसंबधावच्छिन्नत्वंचा तथाचतादृशाधिकरणद्रव्यत्वादिकंभवत्येवउभयत्व
मेवप्रतियोगितावच्छेदकं समवेतत्वत्वादिकंतुतद्विवक्षणेतत्वच्छेदकत्वमितिमतेतुनायंलक्षणःघटकएवोतिवाच्य
उक्ताभावप्रतियोगितावच्छेदकतायाःतादृशाधेयतात्वेसत्वेप्यधिकरणेमानाभावात्। एवंघटसमवेत
त्वस्वरूपसंबधावच्छिन्नपटवृत्तित्वोभयाभावप्रतियोगितावच्छेदकमपिनघटघटितंगोरवादुपेक्ष्यमेव।

ननुसाध्यनिष्ठाभावप्रतियोग्यधिकरणेमूलविषक्षणीयंसाध्यतावच्छेदकसंबंधावच्छिन्नातासंबंधावच्छिन्नत्वेन
प्रयोगितानिवेशेऽयंदोषः।तत्रैवनव्यधिकरणेनसतायांसामान्याद्यभावसमवस्थितआहं।वन्हीमानितिअयोगो
लकेतिअथमहानसीयवह्न्योपर्वतवृत्तित्वाभावासत्वेनैवाव्याप्तेःसत्वस्यापिंडीयवह्न्यनुधावनंव्यर्थमितिचेन्नचयरूपा
वच्छिन्नसामानाधिकरण्याभावःसाध्यनिष्ठस्तद्व्यहेतुतावच्छेदकत्वंवांतथैवदर्थइतित्यत्तत्सार्थक्यायेतिवाच्यम्।द्र
व्यंसत्वादित्याहावतिव्याप्तुमज्ञानपक्षासंदर्भविरोधात-नचयरूपावच्छेदकोचिद्यक्तिरवृत्तित्वाभावेविवक्षणी
यइतिवाच्यं।तथासत्ययंपिंडीयवह्न्यनुधावनवैयर्थ्यतादवस्थ्यात्।मैवंयदिहेतावृत्तित्वाभावमादायाति
व्याप्तिर्वारणायययद्यक्तिवृत्तित्वाभावकूटवत्साध्यतत्तद्व्यक्तिवृत्तित्वानधिकरणत्वविवक्षणेतदावह्निमान्धू
मादारीयावान्हेतुमंतितत्तद्व्यक्तिवृत्तित्वाभावकूटसंभवतिस्याविष्कर्तुमयंपिंडानुधावनात्।नचैवंसख्यावान्परिमा
णादित्यादौयत्किंचिदवृत्त्यधिकरणवृत्तित्वाभावाघटितकूटमादायाव्याप्तेःसंभवात्तत्कोनंकारणंविषमव्याप्तस्य
भिधानासंगतिरितिवाच्यं।तेषांलघ्वादिरूपेणस्थितेषामविरोधित्वात्।वस्तुतस्तुसाध्यनिष्ठोयरूपावच्छिन्नसामानाधिक

ण्याभावइत्येव साध्यनिष्ठासामानाधिकरण्य प्रतियोगित्वमितिदीधितियथाश्रुतसदर्थः तमनुरुध्यतांतेषांविषमव्याप्त
ति। एतेषांचायंपिंडीयवस्त्वनुधावनंसंगछतएव।साध्यासामानाधिकरण्यकेहीवह्नीहीतत्रसमानाधिकरणपदेतत्राग्नि
मनिष्कर्षद्रव्यंसत्वादित्यादावतिव्याप्तिर्नास्तिव्यधिकरणपदेतत्रतुसास्यादितितत्कल्यस्यातिजघंन्यतावारणायटीकाका
रैस्तद्वारणप्रकारोदर्शितः तंमनुरुंधानानांतुतत्रसमव्याप्तेऽव्याप्तौपर्वतीयवह्नेमहानसवृत्तित्वाभावमादायाव्याप्तौचन
कश्चिद्विरोधः नचसामानाधिकरण्यस्याव्याप्यवृत्तितामतमवलंब्यद्रव्यंसत्वादित्यादावतिव्याप्तिःकुतोनवार्यतइतिवाच्यं।
द्रव्यावान्यरिमाणादित्यादिसमव्यापकक्रियावत्त्वावच्छेदेनसाध्येसमाधिनाधिकरण्याभावमादायाव्याप्तेरपिसमव्यापका
नुधावनस्यैवयथ्यात्।साध्याधिकरणावच्छेदकत्वविशेषणदानेचद्रव्यंसत्वादित्यादावतिव्याप्तेःहेत्वधिकरणावच्छेदक
कालेतुस्वानाश्रितस्यतद्व्याप्यवृत्तित्वस्याबलंबनस्यायुक्तत्वाच्च।साध्यतावच्छेदकव्यापकतानिरूपकाधिकरणतावि
शेषाभावस्यसाध्यतावच्छेदकव्यापकत्वादव्याप्तिः। नचनिरूपकतासंबंधेनाधिकरणतावदभावःप्रवेश्यइतिवाच्यं।तथासति
समवेतत्वसंयुक्तत्वयोर्निरूपकतायाएकजातीयत्वेनसाध्यतावच्छेदकसंबंधावच्छिन्नत्वस्याधेयतावशेषणस्यैवयथ्यात्।

तत्तन्निरूपकतात्वेनसंबंधत्वोपगमेतुविशेषरूपेणसंसर्गतानन्वयस्तावान्समवधित्वादावव्याप्तिर्नाहृतेवाआधेयतासंबंधाव
च्छिन्नाधिकरणाभावस्यहृदनियामकसंबंधावच्छिन्नप्रतियोगिकत्वेनाप्रसिध्यानिवेशासंभवादितिचेत्तर्हिसाध्यतावच्छेदकसंबं
धान्यसाध्यप्रतियोगिकसंबंधन्यसंबंधावच्छिन्नत्वमात्रेयेयतायानिवेशनीयं। ननुवंवह्निमान्धूमादित्यादावह्नौस्वरूपसंबंधाव
च्छिन्नपर्वतवृत्तित्वसंयोगसंबंधावच्छिन्नपर्वतवृत्तित्वोभयाभावसत्वाद्व्याप्तिः नचतत्प्रतियोगितावच्छेदककोटावाधेयत्वस्यां
तर्भावः। अन्यथावह्नौसंयोगसंबंधावच्छिन्नपर्वतवृत्तित्वासत्वेनदोषेभ्यापातात्तदंतर्भावेचनाधिकरणमात्रेतादृशसंबंधेनावच्छेद
कत्वपर्यासिरितितादृशाभावेनलक्षणघटकरतिव्याच्यं। अधिकरणमात्रेनिरूपकतासंबंधेनावच्छेदकत्वपर्याप्तिः सकलमतसि
द्धत्वात्। अन्यथावह्यादौहृदादिवृत्तित्वाभावप्रतियोगितावच्छेदकत्वपर्याप्तेरिदादावसत्वाप्रसंगात्कालिकादिसंबंधेनहृदादिवृत्ति
त्वसत्वंनतादृशाधेयतात्वस्यतदंतर्भावावश्यकत्वादितिमैवं।तादृशाधेयतावृत्तिव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगितानिवेश
नादोषात्।वस्तुतस्तुभ्रमेयवान्धरादित्यादौसमवायसंबंधेनसाध्यतायासमवायान्यसाध्यप्रतियोगिकसंबंधान्यसंबंधःसम
वायएवनतदवच्छिन्नसामान्यादिवृत्तित्वमप्रसिद्धमेवेतिनोक्तं -- धेयतावैशिष्ट्यंसम्यक्किंतुसाध्यतावच्छेदकसंबंधावच्छिन्न

त्वमेव। तथाचसत्तावान्समवायित्वादिसादावव्याप्तिमनुद्भाव्यैववह्निमान्धूमादित्यादीनादूषणांतरपरोगौरवमित्यतऊथान्यथा

स्वरूपसंबंधावछिन्नपर्वतवृत्तित्वाभावस्यवह्निसामान्यवृत्तित्वादव्याप्तिसंभवगौरवाभिधानासंगतेरित्येवसम्यक्। अत्रसमा
नाधिकरणपदंतऊक्तीत्यात्मकसाध्यसामानाधिकरण्यपदस्यसाध्यनिष्ठाधेयंतानिरूपकाधिकरणवृत्तित्वमेवार्थः। नविग्र
हस्योदक्षरत्वशंकावानगोपदार्थोततोयः समासांतरादरणायतदर्थस्वपरप्रसयार्थः नतुलक्षणघटकाशनिबोध्यं। अनि
रूपकत्वं। अग्निरूपकत्वप्रतियोगिनिरूपकत्वं। आधेयतात्वावछिन्नाआधेयतस्वव्यापकं। तथाचसाध्यनिष्ठाधेयतत्व
व्यापकनिरूपकत्वावछिन्नप्रतियोगिताकभेदवन्निरूपितवृत्तित्वानधिकरणत्वमितिनिष्कर्षः। नचाधेयत्वमाधेयतायामि
वस्त्वधिकरणत्वानिरूपकत्वंचपर्वतादावेवेतिवैयधिकरण्यात्कथंव्यापकत्वमितिव्याच्यं। स्वाश्रयाधेयताश्रयत्वसंबंधेना
धेयतातंव्यायंस्वनिरूपितवृत्तित्वसंबंधेननिरूपकत्वंव्यापकमितिवृत्त्यादिरूपसाध्यांतर्भावेनव्यापकत्वोपपत्तेः। नचसा
ध्यनिष्ठाधेयत्वस्यद्रव्यत्वावछिन्नधेयतासाधारणस्यनिरुक्तसंबंधेनजलेसत्त्वान्नोक्तसंबंधेनवस्त्वधिकरणत्वरूपनिरू
पकत्वासंभवः। यद्विद्रव्यंत्वावछिन्नाधेयतानिरूपिताधिकरणत्वरूपस्यह्रदादिसाधारणानिरूपकत्वस्यतादृशाधेयं

त्वव्यापकतयागुणादेरवतेदवच्छिन्न प्रतियोगिताकभेदवत्तेन नाव्याप्तितादवस्थ्यंतुल्ययुक्तंधूमवान्वह्नेरित्यादावतिव्याप्तितादवस्थ्यंमितिवाच्यं। आधेयतात्व्याप्यस्वामिनिरूपकतायांनिवेश्यत्वात्। आधेयतात्व्याप्यत्वंचसाध्यानुयोगिकत्वं विशिष्टस्वाश्रयाश्रयत्वसंबंधावच्छिन्न प्रतियोगिताकाधेयतात्वाभाववत्तित्वनिरूपितवृत्तित्वसंबंधेनावृत्तित्वात्स्वाश्रय निरूपिताधेयतात्वप्रवेशेवह्निसमानाधिकरणद्रव्यांतरव्याप्यत्वभंगप्रसंगः। नच्चैवंवह्निमान्धूमादित्यादावव्याप्तिः। वत्यधिकरण यावन्मात्रनिष्ठावत्त्वाधिकरणतारूपनिरूपकतायावन्निष्ठत्वंचाधोलादिसाधारणद्रव्यत्वावच्छिन्नाधेयतात्व्यापकत्वा संभवाद्द्रव्यत्वावच्छिन्ननिरूपकतायास्तादृशाधेयतात्वाव्याप्यंत्वादितिवाच्यं। साध्यानुयोगिकत्वविशिष्टस्वाश्रयत्वसंबंधे न साध्यनिष्ठाधेयतात्वाधिकरणनिष्ठभावाप्रतियोगित्वरूपतादृशाधेयतात्व्यापकत्वनिवेशात्। अथैवंभावेसाध्यावच्छेदक व्यापकत्वनिवेशगौरवापेक्षयानाम संगतं। समनेयत्यप्रवेशमपेक्ष्यलाघवात्। अन्यदेतत्समाधानमाकलयामः। वस्तुत्वाधेयता विशेषाभावस्यसाध्यतावच्छेदकव्यापकत्वाद्व्याप्तिः। नचनिरूपकतासंबंधेनाधिकरणवृत्तभावः प्रवेश्यइतिवाच्यं। तथासतिसं युक्तत्वसमवेतत्वयोर्निरूपकतायाएकता — त्तेनाधेनाधेयतायाःसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंवैयर्थ्यात्त्। साध्यवच्छेद

कतर --- तोसंबंधावच्छिन्नाधेयतयोभयनिरूपकाधिकरणावत्त्वसत्त्वेनतदभावस्यसाध्येसत्त्वनातिव्याप्तेश्च। ननन्निरू
कतत्वेनसंसर्गतंतुविशेषरूपेणसंबंधत्वापत्तिपराहतं। नचसाध्यतावच्छेदकसंबंधावच्छिन्नाधेयत्वावच्छिन्नत्वंप्रतियोगितावि
शेषणंमितिवाच्यं। एवमपिपूर्वक्षणवृत्तित्वविशिष्टपर्वतसंयुक्तत्वाभावमादायाव्याप्तिः। नचाभावेव्याप्यवृत्तित्वंनिरवच्छिन्नवि
शेषणतासंबंधेनव्यापकत्वंवानिवेश्यमितिवाच्यं। एवमपिघटपर्वतसंयुक्तत्वाभावावारणात्। नचप्रतियोगित्वेयधिकरण्या
घटितसाध्यतावच्छेदकव्यापकत्वोपादानादुक्ताभावसघनिरासाइतिवाच्यं। तथापिविरूढ्यादपर्वतसंयुक्तत्वाभावा
घवारणात् ----- तस्यकेवलान्वयित्वनातदभावासत्त्वात्। नचतदवारणेपिनक्षतिः पर्याप्तिसंबंधेनतदवच्छेदकतायाउ
ऽयत्रैवसत्त्वात्तदभयावृत्तित्वस्यरूपसंभवेनाव्याप्तसत्त्वादितिवाच्यं। उक्तपर्याप्तिः प्रत्येकपर्याप्तिरूपत्वात्। अतः साध्य
तावच्छेदकसंबंधावच्छिन्नाधेयतासामान्यवृत्तित्वेप्रतियोगितविशेषणमावश्यकंतच्चावच्छेदकताघटकनिरूपकत्वरूपसं
बंधनिरूपकतादृशसंबंधावच्छिन्नाधेयतात्वव्यापकत्वमितिनासंभवः। स्वप्रतियोग्यसामानाधिकरण्यंचाभावविशेषणमि
तिपूर्वक्षणवृत्तिविशिष्टपर्वतसंयुक्तत्वाघभावनिरासः। तथाचसाध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वमेवसाध्यतावच्छेद

कव्यापकत्वमितिव्यापकताद्वयसत्वेपिअधिकविशेषणसत्वाद्वैलक्षण्याभाससंगतिरनपेक्षेतिश्रुतबुद्धयोविदांकुर्वंतु। अत्रेदंवो
ध्यं।समनैयत्यनिवेशंतत्रपरंपरासंबंधनांसंबंधत्वंचापेक्ष्यंद्रव्यत्वावच्छिन्नाधेयतावारणायसाध्यतावच्छेदकव्याप्यधर्मांतरा
नवच्छिन्नसाध्यनिष्ठाधेयत्वांतरनिष्ठन्यूनवृत्तितानिरूपकाधेयतान्यत्वंसाध्यनिष्ठाधेयतविशेषणंतत्रद्रव्यत्वावच्छिन्नाधे
यतामादायाव्याप्तिवारणायानवच्छिन्नांवमंतरविशेषणं। एतद्रूपादिसाध्यकेतत्तल्लक्षणावच्छिन्नतद्रूपत्वावच्छिन्नाधेयतानि
मेवप्रसिद्धिःसाध्यनिष्ठाधेयत्वत्वावच्छेदेनत्यस्याप्यत्रैवार्थतार्थ्यं। साध्यनिष्ठताद्दशाधेयत्वनिरूपकत्वसामान्याभावश्च
निवेश्यः। अथवासाध्यतावच्छेदकसमनियताधेयत्वेवनिवेश्या ---मेदमादायैवातोलक्षणद्वयेरव्याभासप्रकारेयथाश्रुतदी
धितेरनुसारेणगौरवाभिधानं। अथवासाध्यनिष्ठाधेयतायांसाध्यतावच्छेदकानवच्छिन्नाधेयतान्यत्वंसाध्यनिष्ठाधेयता
त्वावच्छेदेनेयेतल्लाभ्यं।अवच्छेदकानवच्छिन्नेत्यत्रपर्याप्यनुपादानात्सात्वावच्छिन्नाधेयतायाः साध्यतावच्छेदकावच्छि
न्नतया ------ पंङ्क्तिसंगतिः। तदतिव्याप्तिवारणायपर्याप्युपादानेनुनंत्रद्वयवैयर्थ्यात्साध्यतावच्छेदकावच्छिन्नत्वो
पादानेनायंदोषस्तत्रग्निमग्रंथसंगतिः। नचसाध्यतावच्छेदकावच्छिन्नाधेयतायाउपादानेपिपर्याप्त्यनुपादानाभ्यांपंङ्क्ति

ग्रथोसगच्छतएवेतिवाच्यं।तथासतिसाध्यनिष्ठत्वपरित्यागेनोदक्षरत्वापत्तेः।एतत्सर्वमवच्छेदकभेदाधेयतभिदमभ्युपेत्य।
वस्तुतस्तुसाध्यनिष्ठाधेयतानिरूपकंयद्यत्तत्तद्वृत्त्यवतिवेश्यं।अन्यथाधिकरणभेदेनवनिरूपकतानांभेदाद्वह्निमान्द्रम।
दित्यादावव्याप्तेः।एवंचनिरूपकतामेदेनवाधेयतानांभेदात्साध्यनिष्ठाधेयतानांलक्षणाघटकत्वादेवनदोषः।साध्यनि
ष्ठाधेयतात्वावच्छेदेनत्वस्याथत्रैवतात्पर्यं।एवंचतन्त्रसमनेयत्वादिवैवक्षणंचर्थमेव।एतेनसाध्यतावच्छेदकव्यापकाभा
वप्रतियोग्याधेयत्वानिरूपकाधिकरणवृत्तित्वानधिकरणत्वेतात्पर्यमित्यपास्तं सत्तावान्समवायित्वादित्यादावव्याप्ति
तादवस्थ्याच्च।अथवा साध्यनिरूपितनिरूपकत्वाभावेतादृशनिरूपकभेदेवातत्तात्पर्यं।द्वितीयेसाध्येनरूपेणसुधिक
रणभेदइतिनाभेदशिवं।अत्रासमानाधिकरणपदेअधिकरणपदद्वयमपिआधेयतानिरूपकपरतन्त्रमध्येनत्रप्रवेशा
आधेयत्वानिरूपकवृत्तित्वलाभस्यात्नत्वाधेयत्वानिरूपकवृत्तित्वलाभःमध्यमाधिकरणलाभकासत्वात्।नचाधेयत्वा
निरूपकाधिकारणंतदर्थः।तथाप्यनिरूपकाधिकरणत्वावदित्यनभिधायैवमभिधानेवक्तैवंसालोच्याधिकरणस्यलक्ष
णघटकत्वमाह।।ताहशेति।यत्तुसाध्यनिष्ठाधेयतानिरूपकत्ववदन्यत्वप्रवेशेसंभवः।आधेयत्वाधिकरणत्वांतर्भा

वेनेवावश्यकनिरूप्यनिरूपकभावेकेव्यवहारोपपत्तासाध्यवतः साध्यनिष्ठाधेयत्वांतरेसानाभावइति अधिकरणांतं। तथाच
तादृशाधेयतानिरूपकत्वावछिन्नभेदनवेशान्नदोषइति। तन्न। अधिकरणमाधेयतानिरूपकमितिमुख्यव्यवहारानुरोधेन
निरूपकत्वांतस्वीकारस्यसर्वाभिमतत्वात्। यद्व्यधिकरणनिष्ठनिरूपकत्वांतरोपगमेपिवह्निमान्पर्वतत्तदधिकरणत्वेतद
न्यतरत्वादित्यादौहेतुच्छेदमतः साध्यनिष्ठाधेयतानिरूपकत्वादतिव्याप्तेरधिकरणपदंविलक्षणाधिकरणनिष्ठानिरूपकत्व
लाभार्थं। सचतादृशाधेयतानिरूपकंयदधिकरणमितियोजनयेति। तन्नुच्छेदनरं। अधिकरणतासाधारणानिरूपकत्वे
सानाभावाद्विशिष्टाधिकरणनिष्ठनिरूपकत्वविशेषस्यवलब्धत्वादन्याथाधिकरणपदवैरर्थापत्तेः। नचतादृशानिरूपक
भेदकूटलाभार्थमधिकरणपदमितियुज्यते। तल्लाभस्यनव्यात्राधीनत्वात्। नापिअधिकरणत्वसाध्यनिष्ठाधेयत्वान्वयार्थ
मधिकरणपदं असंभवापत्तेः। साध्यवद्भिन्नस्येतिषष्ठ्यर्थकथनमुत्तरलक्षणेतिव्याप्तिनिरासार्थं। समवायेनेति। यत्किंचित्सं
बंधेनवृत्तित्वोक्तौवातिव्याप्तिर्दृष्टव्या। हेतुतावच्छेदकसंबंधावछिन्नाधेयतासंबंधेनसाध्यनिष्ठाधेयत्वनिरूपकाधिकर
णाभावस्यहेतुतावच्छेदकसंबंधान्यहेतुप्रतियोगिकसंबंधान्यसंबंधावछिन्नतादृशवृत्तित्वाभावस्यत्वयानिवेश ---शव

मिति। व्यापकत्वंचेति। भेदत्वमखंडोपाधिरितिनप्रतियोगितावच्छेदकसंबंधनिवेशः। अवच्छेदकत्वंविशेषणतासंबंधेननिवे
श्यतेनहेत्वधिकरणत्वाभावस्यविषयितासंबंधेनावच्छेदकत्वेपिनाव्याप्तिः। तद्योगोलकभेदवान्नदीघदडादित्यादौकालि
कसंबंधेनहेत्वधिकरणत्वाभावत्वविशिष्टरूपध्वंसादेःसाध्यनिष्ठाधेयतानिरूपकत्वव्यापकतयाऽतिव्याप्तिरतःहेत्वधि
करणत्वाभावत्ववैशिष्ट्यंस्वरूपसंबंधेननिवेश्यमितितुनशक्यांतथाहिहेत्वधिकरणत्वाभावस्यापकत्वात्। ननुगौरवं। एत
द्दलवान्कपिसंयोगादित्यादौहेत्वधिकरणत्वाभावादःकेवलान्वयित्वादतिव्याप्तिश्चेयत आह। अथवेति। इदंतुबोध्यं त
द्दत्समानाधिकरणभेदप्रतियोगितानिरूपितनिरवच्छिन्नविशेषतासंबंधावच्छिन्नावच्छेदकताशून्यत्वेसतिनिरव
च्छिन्नवृत्तित्वंव्यापकत्वंतेननिरवच्छिन्नवृत्तित्वोपादानाज्जन्यज्ञानविषयित्वरूपव्यभिचारिहेत्वधिकरणत्वाभावस्य
निरुक्तव्यापकत्वेपिनक्षतिः। व्यापकीभूताभावप्रतियोग्यधिकरणतानिवेशस्थानेव्यापकीभूतभेदप्रतियोगितावच्छे
दकाधिकरणतानिवेशावानथाचात्यंताभावघटितव्यापकत्वपरिष्कारेनादेयइति। हेत्वधिकरणतात्वव्यापकप्रतियो
गितात्वंनिरस्यति। तथात्वितिं। नादृशेति। व्यापकाभावप्रतियोगितायांअधिकरणतानिष्ठायांतिरूपकतासंबंधेना

वच्छेदकतयाऽवच्छेदकहेतुतावच्छेदककक्षस्यवाच्यतयानविशिष्टपरामर्शानुपपत्तिः। यद्रूपावच्छिन्नाधिकरणता
प्रतियोगिकाभावस्यवस्त्वादिकरणगगने भयाभावादिसाधारणतयाव्याप्तिः तदवच्छिन्नाभावप्रसिद्धेरतः तथानोक्तं। ता
दृशानिरूपकाधिकरणवृत्त्यभावप्रतियोगितायांस्वावच्छिन्नप्रतियोगितात्वसंबंधेनानवच्छेदकीभूताधिकरणतानिरू
पकत्वावच्छेदकंस्वावच्छिन्नाधिकरणतात्वावच्छिन्नप्रतियोगितात्वसंबंधेनानवच्छेदकंयद्धेतुतावच्छेदकंतद्रूपमिति
नविशिष्टपरामर्शस्यानुपपत्तिः। हेत्वभावस्येति। स्वामित्वादिवत्स्वनियामकसंबंधेननहेतुता। तत्रंधानादिसंबंधस्यव्याप्य
तयैवोपपत्तेः। वह्न्यादेः साध्यत्वरूपादेः संयोगनहेतुतायांव्याप्त्युपगमेपिनक्षतिः। तत्रपक्षधर्मतावित्रहादेवपरामर्शस्या
प्रमात्वसंभवादित्यर्थः। हेत्वभावप्रतियोगित्वंयधिकरण्यसत्वेनव्यापकताघटकाभावस्यहेतुमत्ताग्रहविरोधितानिया
मकसंबंधावच्छिन्नप्रतियोगितानिवेश्याह। अन्यथेति। इत्यमिति। अधिकरणतात्वेहनसंबंधितातादात्म्यनसाध्यता
यामिहतादात्म्येन साधनतायामपिव्याप्यत्वंगीकारात्। निरुक्तार्थेवक्ष्यतीति। साध्यव्यधिकरणंयस्येतिविग्रहः व्यधिकर
णमिति। बहुव्रीहिरूपोत्तरपदघटितः। तत्रविभिन्नमधिकरणंभिन्नसाध्यतानिरूपकभिन्नमधिकरणंयस्येतिविग्रहात्

यदाधेयतानिरूपकत्वावच्छिन्नप्रतियोगिताकभेदवदधिकरणमवृत्ति। समासातु अधिकरनुष्ठाभे
दप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावानबुध्यतेऽइति। शेषमग्निमरीसाद्दृष्टव्यं। साध्येतीति। विभिन्नमधिकर
णंयस्येतिद्यधिकरणंतस्यभावस्तत्वंसाध्याद्वेयधिकरण्यंसाध्यवैयधिकरण्यंसाध्यपदस्यसाध्याधिकरणलक्षणेतिसा
ध्यानधिकरणवृत्तिलक्षाभः। दीधितावेकोस्यसनेनतदुभयमपि। तदुभयशब्दप्रतिपाद्यमपिनसाध्यानधिकरणानधिक
रणशब्दप्रतिपाद्यमित्यर्थादनुवादलक्षाभः॥ नचानुवादार्थदूषणेपिपुरोवादार्थोनिर्दुष्टएवेतिवाच्यं।समनियतानुवा
दार्थमुखस्यपुरोवादार्थमुखानन्यत्वात्। प्रथमलक्षणेति। साध्यविरोधव्यापकलाभस्तथाहापितादृशासाध्यवद्भेदव्या
पकत्वलाभआशंक्यतेनथासतिअनधिकरणमितिप्राथमिकसमासासंभवादित्यनेनविरोधात्किंतुसाध्यानधिकरण
मधिकरणं - - - - नैवमापिपश्चान्नञ्समासवक्ष्यमाणरीत्यानत्रोमध्यनिवेशाद्यदधिकरणलाभाल्लक्षभःसंभ
वति - - - - - - - भावप्रत्ययांतबऊत्रीत्यर्थीभूतनत्र्यावि्धा -- यत्तेनेव -- तदन्वया -- धिकरणतया
नञोयद्धर्मावच्छिन्न स्याप्यकपदसमभिव्याहारस्तद्धर्मावच्छिन्न प्रतियोगिताकत्वलाभबाधकत्वबुद्धत्तेः। तर्कालंकरमते

अनधिकरणमितिप्राथमिकसमासः कथंचित्संभवतीतिचेत्तद् - - - - - - अनुवादत्वनियमः। तत्रप्रथमे
पुरोवादस्यबहुव्रीहिगर्भबहुव्रीहित्वात्तत्पुरुषगर्भबहुव्रीहित्वमनुवादस्यनयुज्यतेबहुव्रीहिगर्भबहुव्रीहित्वेतुनसता
वानुजातेरित्यादावव्याप्तिवारकौ - - - - - द्वितीये - पुरोवादवदनुवादस्यतत्पुरुषगर्भबहुव्रीहित्वादनुवादत्वं - -
पुरोवादस्यतथाविधानञ्समासागर्भबहुव्रीहित्वेप्यनुवादस्यतथाविधानञ्समासगर्भबहुव्रीहित्वोपगमेनसतावान्
जातेरित्यादावव्याप्तिवारकार्थं - - - इतिप्रथमेसूपादानमवतिविशेषकं। वस्तुतस्तुअनुवादपृच्छस्यपुरोवादपृच्छसा
जात्यानुवादपृच्छस्यतदीयत्वेभ्रमः स्यात् - णानोपपदिकाभिधानेचानिग्रहइतितदविवक्षान्नमतेसुवचेवस्वमतेचप्र
थमेसूपलक्षणं। द्वितीयेपिद्रष्टव्यमिति। साध्यमधिकरणानधिकरणेतिविग्रहेअधिकरणमधिकरणमाधेयतानिरू
पकंयस्येतिसमस्यन्तञ्समासरूपमुत्तरपदंतत्रोत्तरपदस्यसंसर्गबोधकतयानञोमध्यनिवेशस्यासाधुत्व
मेवस्याशंकते। नचेति। साध्याधिकरणानधिकरणत्वस्याभावः साध्यानधिकरणानधिकरणत्वमिति। नञ्योन्योन्याभावसमासः
ससंबंधिकत्वनियमाकांक्षत्व नियतः संबंधीयस्येतिअर्थात्तत्संबंधित्वंजिज्ञास्यते। संबंधोपस्थितिनियतोपस्थितिक

त्वंवा। चैत्रस्य भार्येसादौ भार्यत्वेघटानधिकरणत्वमित्यादावधिकरणपदार्थैकदेशात्मनः भावप्रत्ययार्थादेश्चैत्रादिपदा
र्थान्वयात्॥ मध्यनिवेशःसंसर्गबोधकपदोत्तरपूर्वस्थाने। जगदीशमतंनिराकरोति। नहीति। घटानधीति घटस्यन
अधिकरणमितित्रिपदसमास्तान। अनुशासनाभावात्। घटादिसंसर्गभानादिति। नत्वधिकरणादिनेति। नाभिमतलाभइति
भावः॥ राज्ञापुरुषइति। राज्ञोः पुरुषइतिविग्रहः॥ एतेननाधिकरणमनधिकरणंघटस्यानधिकरणंहिघटानधिकरणंतत्रा
धिकरणपदंवयघराधिकरणलक्षणाघरपदंतात्पर्यग्राहकमित्यंपास्तं। तथासतिपुरुषस्यराजपुरुषलक्षणाराजपदं
तात्पर्यग्राहकमित्यस्यापिसुवचत्वात्॥ ननुसाध्यानधिकरणेत्याद्यनुवादस्ययदधिकरणानधिकरणंसाध्यमित्याद्यर्थप्र
तिपादकत्वमसंगतंसाध्यनिष्ठाधेयत्वाभावनिरूपकाधिकरणप्रसिद्धेत्यग्निमेहत्तलग्नकतापेतःतस्यसाध्यनिष्ठाधेयत्वानिरू
पकत्वाद्यर्थप्रतिपादकतयाऽप्रसिद्धिकथनस्याकिंचित्करत्वादतस्तारशानुवादस्यतत्प्रतिपादकत्वंदर्शयति। साध्यतिहत्व
कथनादिति। साध्याधिकरणानधिकरणइतिशब्दाभावात्। प्रथमलक्षणइति। द्वितीयलक्षणेमणितएवहेतुलाभात्। व
क्ष्यमाणेति। एतच्चयत्किंसाध्यनिष्ठाधेयत्वानिरूपकत्वमभिप्रेत्य। अन्यथानदसंगतेर्दुर्वारत्वात्। यथासंभवमिति। नानाव्य

क्तिसाध्यकहेतुकत्वसामानाधिकरण्येनेत्यर्थः। अवच्छेदकावच्छेदेनान्वयबाधकमाह। तेनेति। यद्यपिशब्दवान्गगनत्वादित्यादावपि नाव्याप्तिः तथाप्यग्निमग्रंथपदप्रयोजनंनन्तत्रेतितत्सागवक्ष्यमाणरीत्याएकसाध्यव्यक्तिनिष्ठाधेयत्वसादिरीत्याऽतएव नानाव्यक्तिसाध्यकेऽतिग्रंथस्यसामानाधिकरण्येनाव्याप्तिपरत्वं। सर्वत्रत्वनेनद्वितीयलक्षणएवावच्छेदकावच्छेदनाव्याप्तिवक्ष्यति। अन्यथात्रापिसर्वत्रेतिकिंनवदेदितिभावः। दृश्यतावच्छेदकावच्छेदनान्वयस्येत्यर्थः। यद्वेति। परस्परऽइति। ननुयत्किंचित्साध्याप्रतियोगिकाभावाधिकरणं यत्किंचिद्यत्साध्यवत्समानायत्किंचित्तत्साध्यप्रतियोगिकाभावाधिकरणं यत्किंचित्तत्साध्यंतदुभयवृत्तित्ववृत्तित्वातार्थः तत्रचसत्ताद्रव्यत्वपृथिवीत्वान्यतमवान्जलत्वादित्यादावव्याप्तिलाभात्प्रवेतेतिचेन्न। यत्किंचित्साध्याभावाधिकरणीभूतंहेत्वधिकरणंवृत्तिवृत्तिसाध्यतावच्छेदकत्वस्यासमुदायार्थत्वात्। यत्किंचिदितिनिरूपकान्वेति। अत्रविशिष्टधर्मावच्छिन्नाधेयतासत्रनिरवच्छिन्नत्वनिवेशवैयर्थ्यमितिमतनिराकरणमाह। आधेयतायामिति। यत्किंचित्वंव्यक्तावन्वेति। मूलेति। यद्यपित्तत्रेतिशब्दोलक्ष्यैकदेशान्वयिनव्याप्तिःसाध्यावच्छिन्नभेदनिवेशपक्षएवा। तथापिधूमवेतिचकारेणतत्रेत्यस्यानुषंगाद्यत्किंचिन्निवेशकल्पेयत्किंचित्साध्यानधिकरणाधिकरणं

रुक्तमयेत्रवहेतुरितिभावः अन्यान्तरिति। संभवेनन्यूनतापत्तिरितिशेषः हेतुमदिति। यत्किंचित्पदार्थवदित्यर्थः संयोगनशेषा
लादिमद्भावच्छेदनलक्षणादिमत्स्वावयवावच्छेदनवह्निसामानाधिकरण्याभावसत्वाद्व्याप्तिरतोहेतुपदं। अभावमात्रमि
ति। चरमाधिकरणत्वांशस्यागमप्रिप्रत्यधिकरणभेदवादिनि। भेदरूपनाव्याप्यवृत्तिरितिभावः। नन्विदमयुक्तं। विशिष्टातिरि
क्तापक्षसाध्याघटितमूर्तेविशिष्टशब्दबोध्यस्यवस्तुतोनधिकरणत्वस्यसाध्यव्याप्तित्वासंभवात्तच्छब्दबोध्यस्यसाध्यसा
मानाधिकरण्याभावात्मकस्यादित्यत आहा अभावधीति। परस्परेति। यथारूपनिष्ठायांतदधिकरणतायांस्वावयवोनावच्छद
कस्तथाधूमनिष्ठायांतदधिकरणतायांपर्वतोनावच्छेदकइत्यर्थः। कस्यापीति। वह्निमदित्यस्यासंवद्धत्वसूचनाय। इदानीधू
मेनवह्निमत्संयुक्तत्वमितिप्रतीतिस्तत्रप्रमाणं। नतुतत्रपर्वतइतिदेशत्वेनपर्वतांतर्भावइत्याशयेनकालोपाधिविधयेति। वै
लक्षण्यानुपगमेबाधकमाह। यदिति। यस्यदंविलक्षणावच्छेदकत्वापरं कालविधयावच्छेदकतायादेशविधयाविलक्ष्यानुपगम
पर्वतस्यकालविधयाऽवच्छेदकत्वतदात्मकधर्मेनिष्ठासाध्यसामानाधिकरण्याभावोयदेशविधयावच्छेदकत्वासंवेतधूमेनवह्नि
मत्संयुक्तत्वमितिप्रत्ययापत्तिःस्यात्तस्यविलक्षणावच्छेदकत्वानिरुक्तत्वेनेत्यर्थः। तादृशावच्छेदकतयाभेदविशेषमाणमित्याशं

कावारणायेदानीमिति प्रतीतिनियामकेति। इहेति प्रतीतिनियामकावच्छेदकतातदीयकालविधयावच्छेकतावच्छिन्नविशेष्यप्रमाविषयधूमनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकतात्वादितिप्रयोगः। तत्सर्वतधूमेनवह्निमत्संयुक्तत्वमितिप्र
त्ययासिद्धावपिनक्षतिः पर्वतादेदेशाविधायावच्छेदकत्वेतत्प्रत्ययापत्तिरितिवाच्यं। अथवापर्वतादोदेशाविधायावच्छेदकत्वस्यामा
वात्तत्रतादृशावच्छेदकतावच्छिन्नविषयकप्रत्ययाभावः। तादृशावच्छेदकतानिरूपितविषयतासंबंधावच्छिन्नधूमनिष्ठवह्निमद
वृत्तित्वप्रत्ययाभावोवाधर्मिगितत्वस्यप्रमात्वविशिष्टहेतुज्ञाननियामकत्वादितिऋजुःपंथाः। व्यभिचारिणिकालिकादिसंब
धनहेतौविति। संयोगेनवह्निमानकालिकेनधूमादिस्थलेदिव्यभिचारिणीत्यर्थः॥ व्यभिचारनिरूपकहत्वधीकरणीभूतह्रदा
द्यवच्छेदनवह्निमन्निरूपितकालिकसंबंधावच्छिन्नवृत्तिताभावस्यहेतौसत्वेपितस्यहत्वधिकरणीभूतह्रदनिष्ठाकालिकसंबं
धावच्छिन्नावच्छेदकताकत्वनियमेननलक्षणघटकतावितुह्रदावच्छेदनह्रदसमवेतरूपादावव्याप्तेः। तादृशाभावस्यैति। तद्वि
न्नत्वस्यहेतौसत्वादतिव्याप्तिः। नचधूमावयवावच्छेदनकालिकसंबंधावच्छिन्नतथाविधवृत्तितावावस्यैवहत्वधिकरणी
भूतोयः स्वावयवः तन्निष्ठसमवायसंबंधावच्छिन्नावच्छेदकताकत्वान्नातिव्याप्तिरितिवाच्यं। एवमपिसमवायेनपृथिवीत्वान

कालिकेनघटत्वादित्यादौनिरवयवेव्यभिचारिणिविपक्षीभूतजलसमवेतरूपस्येवतादृशसाध्यवद्वृत्तित्वाभावाधिकरणतयाहेतोस्तद्विन्नत्वादतिव्याप्तिः। नचतत्रापिजन्यत्वसामानाधिकरण्यावच्छेदेनसाध्यवद्वृत्तित्वाभावसत्त्वान्नातिव्याप्तिरितिवाच्यं। तथाप्यत्तक्रियाभिन्नंकालिकेनघटादित्यादावतिव्याप्तेः। तत्रक्रियायाएवव्यभिचारनिरूपकाधिकरणतयातस्याः कालिकेनैवहेतुनिष्ठसाध्यवद्वृत्तित्वाभावस्यावच्छेदकतयाहेतुनिष्ठत्वादृशवृत्तित्वाभावानलक्षणघटकःकिंतुतत्क्रियात्वेनैवतादृशवृत्तित्वाभावप्रसिद्धिरितिव्याप्तिः। एवंमहाकालभिन्नंकालिकेनकालभेदात्प्रलयाभिन्नंकालिकेनगोत्वादित्यत्राप्यतिव्याप्तिरियाशंयातत्कालभेदवान्कालिकेनकालभेदादित्यादौविरुद्धेसाध्यवन्निरूपितकालिकंसंबंधवच्छिन्नवृत्तित्वाप्रसिद्धेरुक्तंव्यभिचारिणीति। कालिकादीत्यादिनासंबंधसामान्यपरिग्रहः। वैशिकसंबंधेनात्मत्वाद्यनधिकरणकालस्यैतत्कालिकसंबंधेनैवावच्छेद्याधिकरणसंबंधित्वंवक्तुं। तथाचसत्त्वसामानाधिकरण्यावच्छेदकोयःकालस्तन्निष्ठावच्छेदकतायाःकालिकसंबंधावच्छिन्नत्वेपितस्यदृशविधयेवावच्छेदकत्वमितिशास्त्रीयइहघटेऽकाशत्वेआत्मत्वसामानाधिकरण्यमितिप्रत्ययादितिकालिकाव्याप्यवृत्तित्वापत्तेरिति। तत्कालावच्छिन्नत्वस्यतदन्यकालावच्छेदेनतदृत्त्यभावप्रतियोगित्वंव्याप्यत्वेनतदुपगमेतादृशप्रतियो

गित्वापत्तेरित्यर्थः। तद्देशावच्छिन्नत्वंतुतन्यदेशावच्छेदेनतद्वृत्त्यभावप्रतियोगित्वव्याप्यमयत्वादो घटावच्छिन्नवाच्यत्वसामानाधि
करण्येतदन्यदेशावच्छिन्नतद्वृत्त्यभावप्रतियोगित्वस्यासत्वादिति नदोशिकाव्याप्यवृत्तित्वापत्तिः। अन्यस्येवेति। कालविधयाव
च्छेदकतासादिकंअखंडोयाधिरितिभावः। यत्तिदानीमिति। प्रत्ययीयका। लत्तिष्ठविषयत्वानिरूपितत्ववैलक्षण्यमिति। नन्तु
छ। रहेदानीमिति। विभिन्नप्रतीत्याविषयभेदासिद्धियावत्प्रतिनियमविषयतानदीभावरूपवैलक्षण्यासिद्धिः। विभिन्नप्रत्यय
रूपप्रमाणस्यतादृशवैलक्षण्यासाधकत्वाच्चनहिघटः घटस्त्यादिप्रत्ययानांतद्वियत्तदभावादिसा धकत्वमनुव्यवसायस्ये
वनथात्वादिति। ननुव्याप्तेःतत्तद्धर्मित्वरूपत्वेधूमत्वेनधूमत्वादिव्याप्यतावच्छेदकत्वंनस्यात्व्याप्यघटकत्वात्प्रत्येकंतत्तद्ध
र्मित्वरूपव्याप्यतिरिक्तयत्तित्वंधूमत्वादिव्याप्यतात्वाच्चेत्तत्आह। एवंचेति। तावत्तत्तद्धर्मित्वान्यतमत्वंतावत्तत्वविषयकज्ञान
व्यक्तिरेववाविशेष्यतासंबंधेनानुगमकरूपं। नचैवमपिद्रव्यवान्संयोगेनप्रमेयादित्यादौप्रमेयत्वमतिप्रसक्तमेवेतिवाच्यं। स्व
विशिष्टव्यापकतावच्छेदकतादृशरूपकत्वेनैवतस्याप्यवच्छेदकत्वात्। व्याप्यघटकत्वंतुनावच्छेदकतायांतंत्रमितिधूमत्वादो
नतदसिद्धिः। धूमवान्नहेरित्यादौसाध्यसमानाधिकरणहेतोर्व्याप्यत्वेपिवह्नित्वादेर्हेतुतावच्छेदकस्यनावच्छेदकत्वमित्यवच्छे

दकास्वीकारफलंहेतुपदमितिग्रंथंकारमतनानाव्यक्तिहेतुकहेतुत्वव्यक्तिभेदाव्याप्तिभेदःनत्वेतन्मितत्वेतावन्मात्रप्रदर्श
नाया।हेत्वधिकरणावच्छिन्नत्वविशेषणवैयर्थ्यात्।अथवाहेत्वधिकरणावच्छेदेनैवत्वेवकारः प्रणीयः।हेतुतावच्छेदका
वच्छिन्नतंचस्वानुयोगित्वरूपंअग्रेविचक्षणीयमितिप्रथमतोयथाश्रुतार्थाभिधानं।एवंचस्वानुयोगीयादृस्तएवलाभः
तदनवच्छिन्नाधिकरणतान्यतस्यैवकारार्थत्वात्।अत्रकेचित्।हेतुपदंहेतुतावच्छेदकावच्छिन्नपरमितिअन्यथाद्रव्यंविशि
ष्टसत्तादित्यादावव्याप्तेःतत्रसत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमितिप्रतीतिसिद्धायासत्तानिष्ठद्रव्यत्वसामानाधि
करण्याभावाधिकरणतायास्वानुयोगिसत्तानिरूपितसमवायसंबंधावच्छिन्नाधिकरणतावद्गुणादिनिष्ठावच्छेदकता
कत्वेनतदभावविरहासपदेनतदुपादानासंभवात्।तादृशास्वान्यत्वाद्धेत्वधिकरणावच्छिन्नत्वाच्च।हेतुतावच्छेदकावच्छि
न्नलक्षणतस्यास्तादृशहेत्वधिकरणीभूतद्रव्यानवच्छेद्यत्वेनतथाविधाधिकरणतायांद्रव्यत्वनिष्ठायाएवग्रहीतुशक्यत्वे
पितस्याःस्वानुयोग्यधिकरणानवच्छिन्नत्वेनतद्भिन्नातद्भिन्नायाघटाभावादिनिष्ठायास्तथाविधाभावाधिकरणतायाआ
श्रयघटाभावादिभिन्नत्वस्यविशिष्टसत्तायांसत्तात्वेनलक्षणसमन्वयात्तथाचस्वानुयोगिनिष्ठहेतुतावच्छेदकसंबंधा

वच्छिन्नाधेयतानिरूपिताधिकरणतावन्निष्ठहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकतानिरूपितावच्छेद्यत्वावच्छिन्न
भिन्नायाधिकरणत्वतत्तद्व्यक्तृत्वतीयाहेतुतावच्छेदकसंबंधा। वच्छिन्नहेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधि
करणतावन्निष्ठावच्छेदकतानिरूपितावच्छेद्यताशालिसाध्यवदितित्वाभावाधिकरणतातद्व्यत्वंसमुदायार्थः। नचदीधिक
कृहेत्वधिकरणावच्छिन्नत्वंव्यर्थमितिवाच्यं। स्वानुयोग्यधिकरणानवच्छिन्नस्वभिन्नानामतंतानांशैवालादिनिष्ठाधिकरणता
नांव्यावर्त्तयेतदुपादानात्। द्रव्यंविशिष्टसत्तादित्यादौउक्तरीत्यव्याप्तेः। ग्रहतहेतुघटितदुतदुपादानमित्याऊक्तंतदसत्। विशिष्टा
तिरिक्तत्वंविशेषणविशेष्यसंबंधस्यवाच्यापत्तमितिकल्पयोर्द्रव्यंविशिष्टसत्तादित्यत्राव्याप्यसत्तादीधित्कृत्वविशेषणस्येव
वैयर्थ्यंनहेतुपदमितिसंदर्भासंगतेर्दुर्वारत्वात्। विशिष्टस्यातिरिक्तत्वादिति — — विशिष्टपदंविशिष्टाधारतापरमितिचेत्
अस्तुकथंचित्तथापिविशिष्टातिरिक्तत्वाकस्यैवयत्नकारणा। मभिमतत्वान्नदोषः अन्यथातन्नसाधित्वाग्निमद्दृषणा
संगत्यापत्तेः। गगननिष्ठसाध्यसामानाधिकरण्याभाववत्तायाःहेत्वधिकरणानवच्छिन्नत्वात्॥ भवन्मतेद्रव्यंविशिष्ट
सत्तादित्यादेःसंग्रहायतदावश्यकत्वात्तदनुपादायदूषणाभिधानासंगतिः। स्वानुयोग्यधिकरणानवच्छिन्नसाध्यभेद

कूटविशिष्टत्वस्य परिचायकत्वात्तत्तद्व्यसामानाधिकरण्याभावाधिकरणतात्वैवानंतरीवाला द्यधिकरणतानांनि
वेश्यतया विशिष्य निवेश्यतयातद्व्यावृत्तिअनावश्यकत्वंचेति। परंतुस्वानुयोगिनोहेतुतावच्छेदकावच्छिन्नस्य यदधिकर
णमितिरीत्यास्वानुयोगित्वविशेषणतया हेतुतावच्छेदकावच्छिन्ननिवेशार्थमाह। हेतुपदमिति। विशिष्टानतिरिक्तताप्रदर्श
नायविशिष्टसत्तादित्यादिसंग्रहायस्वनयवाछघशेवादिवृत्तिसाध्यवद्वृत्तित्वाभावाधिकरणतानामनंतानांव्यावृत्तये
नतथानिवेशः। तथासतिजन्यगुणाद्यवच्छेदेनविशिष्टसत्तायांसाध्यवद्वृत्तित्वाभावस्वत्वाल्लक्षणसमन्वयः। हेत्वधिकरणा
वच्छेदेनत्वेवकारपूरणात्। प्रकृतहेतोःस्वानुयोगित्वविशेषणदानाच्चतादृशार्थलाभः। पर्वतरूपादावतिपंङ्गुस्वरसो
व्यंत्रेवउदवाच्यंशेयत्वादित्यादेर्हेतोःस्वरूपसंबंधावच्छिन्नसाध्यवद्वृत्तित्वाभावाप्रसिद्धिः। आत्मायवच्छेदेनकालिकसं
बंधावच्छिन्नवाच्यत्ववद्वृत्तित्वाभावासत्वेपितदधिकरणतास्वानुयोगित्वेयत्वाधिकरणावच्छेद्येवयाकाशाभावाधिकरण
तेवतादृशीनिरवच्छिन्नत्वादित्याहुः। स्वानुयोगिनइति। स्वपदमन्यत्वयदित्यग्रधिकरणतापरवह्निमान्धूमादित्यादौच
धूमादिनिष्ठसाध्यसामानाधिकरण्यावाधिकरणतातदनुयोगिनोधूमादेःसंयोगनाधिकरणंपर्वतादितदनवच्छेदा

स्वावयवावच्छेदेनेदंकूटवतीत्वरूपानिष्ठसाध्यसामानाधिकरण्याभावाधिकरणंतत्व। एवंसत्तावान्द्रव्यत्वादित्यादौ
जन्यगुणावच्छेदेनद्रव्यत्वेयासाध्यसामानाधिकरण्याभावाधिकरणतासैवस्वानुयोगिद्रव्यत्वाधिकरणानवच्छेद्यात्तद्भिन्न
त्वाभावादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणंतत्व। एवमिदंवाच्यंज्ञेयत्वादित्यादौ घटावच्छेदेनघटत्वप्रकारकप्र
माविषयत्वंसाध्यवन्निरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वंसत्वेपिघटाद्यवच्छेदेनतदभावस्यसत्वात्स्वपदेनोपात्तायासाध्य
सामानाधिकरण्याभावाधिकरणतातत्तदनुयोगिनोघटत्वप्रकारकप्रमाविशेष्यत्वस्याधिकरणेघटयाहेतुतावच्छेदकसंबं
धावच्छिन्नावच्छेदकतातन्निरूपितावच्छेदतावद्भिन्नासैवतद्भिन्नाचसंयुक्तसमवेतपदार्थवृत्तिसाध्यसामानाधिकरण्या
भावाधिकरणंततोहेतातद्भिन्नत्वात्तत्तत्तल्लक्षणसमन्वयः। जन्यगुणस्यपरोक्षत्वकालिकसंबंधेनैवावच्छेद्याधिकरणस
वधित्वंयातन्निष्ठावच्छेदकतात्वकालिकसंबंधावच्छिन्नाबोध्या। एवंस्वानुयोग्यधिकरणावच्छेद्यशैवालसामानाधिकरण्या
भावाधिकरणतात्वादिकंतत्वतत्रसूक्ष्ममतिभिरूह्यं। स्वानुयोगिनइति। स्वपदमुदासीनाधिकरणतासाधारणाधिकर
णतामात्रपरं। नतुसाध्यसामानाधिकरण्याभावीयाधिकरणतामात्रपरं प्रयोजनाभावात्। स्वपदमन्यत्रापियोग्यापि

करणतापरिमित्यक्तं। नन्वस्यानुयोग्यधिकरणावच्छिन्नं तादृशयत्स्वंतदन्याधिकरणतान्यत्वमेवकुतो नोक्तं। तथा सति धूमरूपयोरधिकरणतायादुर्धरत्वंपिदीर्घदंडशैवालादिनिष्ठाधिकरणता मादायेवलक्षणसंगतिसंभवादिति वाच्यं। जातिमान्सत्तादित्यादौधंसावच्छेदनसाध्यवृत्तित्वाभावादधिकरणतायाः सत्तायांसत्वेपिअधिकरणतावच्छेदकनयोर्हेतुतावच्छेदकसंबंधावच्छिन्नत्वसत्वेनसास्वशब्देनदुर्धरा। किंतुद्रव्यवृत्तित्वाद्यभावाधिकरणतेवतिसर्वस्याऽपिसाध्यसामानाधिकरण्याभावाधिकरणतायास्तदन्यत्वेनाव्याप्तेः। धूमांतरसंयुक्तस्वावयवेत्यादिरीत्याऽव्याप्तेःसानुयोगित्वनिवेशः। केचित्तुस्वानुयोगिनोयदधिकरणमिति। स्वानुयोगिनोयद्यदधिकरणमित्यर्थः। अन्यथाद्रव्यंसत्तादित्यादावतिव्याप्तेः। सत्तायांगुणनद्रव्यत्वसामानाधिकरण्यमिति। प्रतीतिसिद्धागुणावच्छेदकद्रव्यत्वसामानाधिकरण्याभावाधिकरणतास्वंतदनुयोगिसत्तायाअधिकरणंकिंचिद्द्रव्यमेवतदनवच्छेदकासैवतद्भिन्नाचगुणत्वादिनिष्ठाद्रव्यवृत्तित्वाभावाधिकरणतेवतिहेतौतद्द्रव्यत्वस्यसत्तातन्नत्वेवमंतद्रूपवानेतद्रूपादित्यादौस्वानुयोग्यधिकरणस्यैकव्यक्तिकतयानात्वाभावाद्व्याप्तिरितिचेन्न। तच्चैकस्यैवाधिकरणस्यस्वानुयोगिनिष्ठायाहेतुतावच्छेदकसंबंधावच्छिन्नाधेयतावन्नि

रूपितायाअधिकरणतातदवच्छेदकावच्छिन्ननिष्ठावच्छेदकत्वस्यवानिवेश्यत्वात्।स्वानुयोग्यधिकरणताव्यापकावच्छेदकताका
न्यस्वाताद्दशाधिकरणतावच्छेदकायेयेधर्मास्तदवच्छिन्ननिष्ठावच्छेदकतानिरूपकत्वसमुदायाभावत्वंवाद्रव्यंसत्तादित्यादावतिव्या
प्तिग्रस्तमित्याहुः।वस्तुतस्तुहेतुतावच्छेदकसंबंधावच्छिन्नस्वानुयोग्यधिकरतावदनवच्छेद्यत्वंसम्यक्।द्रव्यंसत्तादित्यादौस्वानुयो
गिसत्तावदनवच्छेद्यत्वं---स्येत्यनतिप्रसंगात्।अन्नस्वानुयोगिनोयद्यदधिकरणमितिनिवेशयद्येकालिकसंबंधेनधूमानु
योगिधूमादेर्यद्यदर्थातगर्त्ततयातन्निष्ठहेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकत्वाप्रसिद्धिः।वस्तुतस्तुकल्पेचसंबंधो
नरेणवर्त्तमाननिष्ठाधिकरणतायाअपिस्वानुयोग्यधिकरणानवच्छिन्नत्वमेवगगनादेरपिविषयीतासंबंधेनाधिकरणत्व
वात्॥एवंवह्निमानसंयोगेनरूपादित्यादावतिव्याप्तिः स्वानुयोग्यधिकरणनिष्ठहेतुतावच्छेदसंबंधावच्छिन्नावच्छेदकताका
न्यस्वस्यरूपनिष्ठाधिकरणतायांसत्वादतःस्वानुयोग्यधिकरणताया हेतुतावच्छेदकसंबंधावच्छिन्नत्वनिवेशः।धूमांतरसं
युक्तेत्यादिपोक्ताव्याप्तिवारणंतुनतत्फलं।हेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकतानिवेशस्तेनाव्यासेरभावात्।धूमांतरसं
युक्तस्वावयवावच्छिन्नधूमनिष्ठताद्दशाधिकरणतायाधूमांतरनिष्ठताद्दशाधिकरणतामेदसत्वादुक्तदोषतादवस्थ्यमितिया

येति वाच्यं। स्वावच्छिन्नानुयोग्यधिकरणावच्छेद्यतानवच्छेदकाधिकरणतात्ववच्छिन्नैकभेदस्य नोक्तः। रूपवत्त्वशब्दवाच्यत्व
धिकरणतासाधारणसाध्यवद्वृत्तित्वाभावाधिकरणतात्वस्य पदेनोपादानपतितस्यातिप्रसक्तत्वेनतादृशावच्छेद्यतावच्छे
करणतत्तत्तदवृत्तियातादृशावच्छिन्नभिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतायाः अप्रसिद्धेः। संबंधांतरेणवर्तमानत्वरूपाधिकरण
ताया एवात्तस्यास्वावयवायःपिंडरूपावच्छेदकभिन्नाधिकरणतात्वमात्ररूपत्वाधिकरणतावैशिष्ट्यात्। स्वपदोपस्थित
स्यातिव्यसक्तत्वतादृशावच्छेद्यतानवच्छेदकतयातादवच्छिन्नभिन्नसंबंधांतरेणवर्तमानत्वरूपाधिकरणतायाएवाप्रसिद्धिरिति
न्यायेन। तत्तदधिकरणतानुयोग्यधिकरणानवच्छेद्यत्वकूटविशिष्टाधिकरणत्वावच्छिन्नभेदस्योक्तः॥ यायत्यंतस्यपरिचाय
कतयातत्तोपियथोक्तकल्पेलाघवात्॥ स्वाधिकरणावच्छेद्यसाध्यसामानाधिकरण्याभावाधिकरणतावच्छिन्नत्वनिवेशेन
नुगमात्तत्वानुयोगित्यादिरीत्यानिवेशस्याह। नचेति। इदानींधूमेनवह्निमत्संयुक्तत्वमितिप्रतीतिसिद्धत्तदधिकरणतामादाय
प्रसंजितदोषदेशविधयाविलक्षणावच्छेदकत्वानिवेशप्युद्धरति॥ एवंचेति। यद्यप्येवंसतिस्वानुयोगिनंप्रत्यधूमोतिरसंयुक्तत्वा
वयवनिष्ठसाध्यसामानाधिकरण्याभावावच्छेदकतायाः हेतुतावच्छेदकसंबंधानवच्छिन्नत्वादव्याप्तमापद्यत। तथापिप्रसिद्ध

नुमेतहेतुनिष्ठानां संबंधांतरेणवर्तमाननिष्ठानां अवृत्तिनिष्ठानांचसाध्यवद्वृत्तित्वाभावाधिकरणतानांहेतुतावच्छेदकसंबंधा
वच्छिन्नावच्छेदकत्वानिरूपकतयालक्ष्मिन्नानांतादृशाधिकरणत्वानामप्रसिद्धेरतस्तन्निवेशः। ननुलाघवात्स्वानुयोगिनोहेतावो
